कुर्व्वीत चैषां प्रत्यक्षमर्थसंस्थापनं नृपः" ॥

क्रयविक्रयानुशयः, पुं, (क्रये विक्रये च क्रयविक्रययोर्वा अनुशयः पश्चात्तापः ।) अष्टादशविवादान्तर्गतविवादविशेषः । यथा ।
"वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः" ॥
अस्य विवरणम् । यथा, मनौ ।
"क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
योऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वा" ॥

क्रयविक्रयिकः, पुं, (क्रयविक्रयाभ्यां जीवतीति । "वस्नक्रयविक्रयात् ठन्" ।४।४।१३ । इति ठन् ।) वणिक् । इत्यमरः । २ । ९ । ७८ ॥

क्रयशीर्षं, क्ली, (कपिशीर्ष + पृषोदरात् साधुः ।) कपिशीर्षम् । इति त्रिकाण्डशेषः ॥

क्रयारोहः, पुं, (आ + रुह + अधिकरणे घञ् । क्रयार्थं आरोहः समारोहोऽत्र ।) हट्टः । इति त्रिकाण्डशेषः ॥

क्रयिकः, पुं, (क्रयः प्रयोजनमस्यस्य इति ठन् ।) क्रेता । तत्पर्य्यायः । क्रायकः २ । इत्यमरः ॥ क्रयी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १३ ।
"धनेन क्रयिको हन्ति खादकश्चोपभोगतः" ॥
क्रयेण जीवतीति । "वस्नक्रयविक्रयात् ठन्" । ४ । ४ । १३ । इति व्यस्तादपि ठन्) क्रयजीवी । वणिक् । इत्यमरटीकायां भरतः ॥ (यथा, माघे ।
"पर्य्यापतत क्रयिकलोकमगण्यपण्या" ॥)

क्रयी, [न्] त्रि, (क्रयोऽस्त्यस्य इति । क्रय + इनिः ।) क्रयकर्त्ता । इति हेमचन्द्रः ॥

क्रय्यं, त्रि, (डुक्रीञ् द्रव्यपर्य्यये + "अतो यत्" । ३ । १ । ९७ । "क्रय्यस्तदर्थे" ६ । १ । ८२ । इति साधुः ।) क्रये प्रसारितम् । क्रयनिमित्तं हट्टादौ न्यस्तं यत् द्रव्यम् । इत्यमरः ॥ (यथा, शतपथब्राह्मणे । ३ । ३ । ३ । १ । "क्रय्यस्ते सोमो राजा इति क्रय इत्याह सोमविक्रयी" ॥)

क्रव्यं, क्ली, (क्लव + यत् । लस्य रत्वम् ।) मांसम् । इत्यमरः ॥ (यथा, भागवते । ४ । १८ । २४ ।
"क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ।
सुपर्णवत्सा विहगाश्चरं वाऽचरमेव च" ॥)

क्रव्यघातनः, पुं, (क्रव्यस्य क्रव्यार्थं वा घात्यतेऽसौ । हन् + स्वार्थे णिच् + कर्म्मणि ल्युट् ।) मृगः । इति शब्दचन्द्रिका ॥

क्रव्यात्, [द्] पुं, (क्रव्यं मांसं अत्तीति । "क्रव्ये च विट्" । ३।२।६९ । इति ।) राक्षसः । इत्यमरः ॥ मांसाशिनि त्रि । इति मेदिनी । (गृध्रादिमांसभुक् पक्षिविशेषस्यापि । यथा, रघौ । १५ । १६ ।
"धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः" ॥
"श्मशानपक्षे क्रव्यादो गृध्रादयः" । इति मल्लिनाथः । व्याघ्रादिहिंस्रपशुभेदः ।
यथा, मनुः ५ । १३१ ।
"श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः" ॥
"क्रव्याद्भिः व्याघ्रश्येनादिभिश्चेति" । कुल्लूकभट्टः ॥
ग्राम्यक्रव्यादो मार्ज्जारादयः ।
यथा, मनौ । ११ । १९९ ।
"श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च" ।
"ग्राम्यैः क्रव्याद्भिराममांसादैर्मार्ज्जादिभिः" ।
इति कुल्लूकभट्टः ॥ गुरुपत्नीगामिनां नरकभोगावसाने क्रव्यादां आममांसाशिनां योनिप्राप्तिर्भवति ।
यथा, तत्रैव । १२ । ५८ ।
"तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि ।
क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पगः" ॥
शवदाहकाग्निभेदः । यथा, शतपथब्राह्मणे । १ । २ । १ । ४ ।
"अपाग्ने ! अग्निमामादं जहि निष्क्रव्यादं सेध इत्ययं वा आमाद् येनेदं मनुष्याः पक्त्वाऽश्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति" । "हे अग्ने ! गार्हपत्य ! आमादमग्निमपजहि परित्यज तथा,—
"क्रव्यादमग्निं निःसेधनिःशेषं दूरे गमय" ।
इति भाष्यम् ॥ ऋग्वेदे च । १० । १६ । १० ।
"योऽग्निं क्रव्यात् प्रविवेश वो गृहम्" ॥)

क्रव्यादः, पुं, (क्रव्यं मांसमत्ति । अद् उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । कृत्तं छिन्नं तदेव पुनर्व्विशेषतः कृत्तं पक्वञ्च भुङ्क्ते इति कृत्तविकृत्तपक्वशब्दस्य पृषोदरात् क्रव्यादेशः । इति काशिका ।) राक्षसः । इत्यमरः ॥ सिंहः । श्येनः । इति राजनिर्घण्टः ॥ शवभक्षकाग्निः । यथा, "क्रव्यादो मृतभक्षणे" । इति तिथ्यादितत्त्वम् ॥ मांसाशिनि त्रि । इति धरणी ॥ (पुरा किल केनचिद्रक्षसाग्निमुखादियमेव सा भृगुभार्य्या पुलोमेति विदितेनैवापहृतायान्तस्यां पुलोमायां महर्षिर्भृगुरत्यन्ताऽमर्षमाहरन् त्वं सर्व्वभक्षो भविष्यसीति तस्मै वह्नये शापं प्रददौ तेन हि तस्य क्रव्यादत्वं प्रसिद्धम् । ततः शप्तेनापि तेनाग्निदेवेनात्मनः सर्व्वभक्षकत्वरूपशापं परिहर्त्तुकामेन सर्व्वभक्षः सन्कथं देवादीनां मुखं भविष्यामीति चिन्तयता अग्निहोत्रेषु यज्ञसत्रक्रियासु च आत्मनः संहारश्चक्रे । पितामहस्तु देवादिभिरनुरुद्धो वह्नेः स्वप्रभावमनुस्मारयन् कौशलेन कृतभागग्रहणस्वीकारमकारयत् । एतद्विवरणन्तु महाभारते । १ । ६–७ अध्याययोर्द्रष्टव्यम् । तद्यथा,
भृगुरुवाच ।
"केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षते ।
न हि त्वां वेद तद्रक्षो मद्भार्य्यां चारुहासिनीम् ॥
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा ।
बिभेति को न शापान्मे कस्य चायं व्यतिक्रमः ॥
पुलोमोवाच ।
अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता ।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥
साहं तव सुतस्यास्य तेजसा परिमोक्षिता ।
भस्मीभूतन्तु तद्रक्षो मामुत्सृज्य पपात वै ॥
सूत उवाच ।
इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्व्वभक्षो भविष्यसि" ॥
"शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् ।
किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति" ॥
"अमावास्याञ्च पितरः पौर्णमास्याञ्च देवताः ।
मन्मुखेनैव हूयन्ते भुञ्जते च हुतं हविः ॥
सर्व्वभक्षः कथं तेषां भविष्यामि मुखं त्वहम्" ॥
"चिन्तयित्वा ततो वह्निश्चक्रे संहारमात्मनः ।
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ॥
निरोङ्कारवषट्काराः स्वधास्वाहाविवर्ज्जिताः ।
विनाग्निना प्रजाः सर्व्वास्तत आसन् सुदुःखिताः ॥
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन् वचः ।
अग्निनाशात्क्रियाभ्रंशात् भ्रान्ता लोकास्त्रयोऽनघाः ।
विदध्वमत्र यत्कार्य्यं न स्यात् कालात्ययो यथा ।
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ॥
अग्नेरावेदयञ्छापं क्रियासंहारमेव च ।
भृगुणा वै महाभाग ! शप्तोऽग्निः कारणान्तरे ॥
कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा ।
हुतभुक् सर्व्वभूतेषु सर्व्वभक्षत्वमेष्यति ॥
श्रुत्वा तु तद्वचस्तेषामग्निमाहूय विश्वकृत् ।
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥
लोकानामिह सर्व्वेषां त्वं कर्त्ता चान्त एव च ।
त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥
स तथा कुरु लोकेश ! नोच्छिद्येरन् क्रिया यथा ।
कस्मादेवं विमूढ़स्त्वमीश्वरः सन् हुताशन ! ॥
त्वं पवित्रः सदा लोके सर्व्वलोकगतिश्च ह ।
न त्वं सर्व्वशरीरेण सर्व्वभक्षत्वमेष्यसि ॥
अपाने ह्यर्च्चिषो यास्ते सर्व्वं भोक्ष्यन्ति ताः शिखिन् ॥
क्रव्यादा च तनुर्य्या ते सा सर्व्वं भक्षयिष्यति ॥
यथा सूर्य्यांशुभिः स्पृष्टं सर्व्वं शुचि विभाव्यते ।
तथा त्वदर्च्चिर्निर्दग्धं सर्व्वं शुचि भविष्यति ॥
त्वमग्ने ! परमं तेजः स्वप्रभावाद्विनिर्गतम् ।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्व्विभो ! ॥
देवानाञ्चात्मनो भागं गृहाण त्वं मुखे हुतम्" ।
"एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ॥
जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः" ॥ * ॥
अतएव ऋङ्मन्त्रेण क्रव्यादाख्याग्नेः शान्तिकर्म्मादिष्वपसारणं जातवेदोऽग्नेरादानं प्रोक्तम् ।
यथा, ऋग्वेदे । १० । १६ । ९ ।
"क्रव्यादमग्निं प्रहिणोमि दूरं
यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन्" ॥
"क्रव्यं आमिषं अत्ति क्रव्यादः तं तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि । रिप्रं पापं तस्य वाहः वोढ़ा यद्वा रिप्रं पापं वहति उपपदे "कर्म्मण्यण्" इति वह + अण् । सोऽग्निः यमराज्ञः यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु । अथ शान्तिकर्म्मार्थं उपासने इतरः क्रव्यादादन्यः जातवेदा अग्निः इहैव देशे देवेभ्यः देवार्थं हव्यं वहतु" ॥ इति भाष्यम् ॥
क्रव्यं मांसं अत्ति । अद् + उपपदे "कर्म्मण्यण्" । ३ । २ । १ । इत्यण् । रुरुनामाममांसाशिमृगभेदः ।
यथा, भागवते । ५ । २६ । ११ ।